This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

श्रीगणेशायनमः॥ इहसदाचारंप्रमाणयता निर्विघ्नेनप्रकरणसमाप्त्यर्थमिष्टयोःप्रकृताभिमतयोर्देवतयोश्च
नमस्कारःक्रियतेश्लोकद्वयेन। नमस्तस्मैगणेशाययत्कंठःपुष्करायते। मदाभोगघनध्वानोनीलकंठस्यतां
डवे।१।दशरूपानुकारेणयस्यमाद्यंतिभावकाः। नमःसर्वविदेतस्मैविष्णवेभरतायच।२।यस्यकंठःपुष्कराय
तेमृदंगवदाचरतिमदाभोगेनघनध्वानोनिबिडध्वनिः नीलकंठस्यशिवस्यतांडवेउद्धतनृत्ततस्मैगणेशा
यनमः। अत्रखंडश्लेषाक्षिप्यमाणोपमाछायालंकारः। नीलकंठस्यमयूरस्यतांडवेयथामेघध्वनिःपुष्करायत
इतिप्रतीतेः। दशरूपकोनुकारेणेति। एकत्रमत्स्यकूर्मादिप्रतिमारूपेणान्यत्रानुकृतिरूपनाटकादिना। यस्यभाव
काध्यानारोरसिकाश्चमाद्यंतितस्मैविष्णवेभिमतायभरतायचनमः। श्रोतुःप्रवृत्तिनिमि।त्तंप्रदर्शयते कस्यचि
देवकदाचिद्दययाविषयंसरस्वतीविदुषः। घटयतिकमपितमन्योव्रजतिजनोयेनवैदग्धीं। तंकंविषयंप्रकरणा
दिरूपंकदाचिदेवकस्यचिदेवकवेःसरस्वतीघटयति। येनप्रकरणादिनाविषयेणान्योजनोविदग्धोभवति
प्रकरणादिरूपनाटकादीत्यर्थः। स्वप्रवृत्तिविषयंदर्शयति। उद्धृत्योद्धृत्यसारंयमखिलनिगमान्नाट्यवेदंविरंचि
श्चक्रेयस्यप्रयोगंमुनिरपिभरतस्तांडवंनीलकंठः। शर्वाणीलास्यमस्यप्रतिपदमपरंलक्ष्मकःकर्तुमीष्टेनाट्याना

१

Acc. No.- 1495 M1433
Title - दशरूपवृत्ति. (अपूर्ण)
Author - धनंजय
Date - ?
Subject- ~~छंद~~ Poem
folio - 15
Xerox - 28

KKSU LIBRARY
RAMTEK
441 106
M-1433
Dist Nagpur

Checked 2012

1

किंतुकिंचित्प्रगुणरचनयालक्षणंसंक्षिपामि।यंनाट्यवेदंवेदेभ्यःसारमादायब्रह्माकृतवान्।यत्संबंधमभिनयंभरतश्चकार।करणांगहारानकरोत्।हरस्तांडवमुद्धतं।लास्यंसुकुमारंनृत्तंपार्वतीकृतवती।तस्यसामस्त्येनलक्षणंकःकर्तुंशक्तः।तदेकदेशस्यतुदशरूपकस्यलक्षणसंक्षेपःक्रियतइत्यर्थः।विषयैक्यप्रसक्तंपौनरुक्त्यंपरिहरति।व्याकीर्णेमंदबुद्धीनांजायतेमतिविभ्रमः।तस्यार्थस्तत्पदैरेवसंक्षिप्यक्रियतेंजसा।व्याकीर्णेविक्षिप्तेविस्तीर्णेशास्त्रेमंदमतीनांपुंसांमतिमोहोभवतितेनतस्यनाट्यवेदस्यार्थस्तत्पदैरेवसंक्षिप्यऋजुवृत्त्याक्रियतइति।इदंप्रकरणंदशरूपज्ञानफलंदशरूपज्ञानंकिंफलमित्याह।आनंदनिष्यंदिषुरूपकेषुव्युत्पत्तिमात्रंफलमल्पबुद्धिः।योपीतिहासादिवदाहसाधुस्तस्मैनमःस्वादपराङ्मुखाय।तत्रकेचित्।धर्मार्थकाममोक्षेषुवैचक्षण्यंकलासुचाकरोतिकीर्त्तिंप्रीतिंचसाधुकाव्यनिषेवणमित्यादिनात्रिवर्गादिव्युत्पत्तिंकाव्यफलत्वेनेच्छंतितन्निरासेनस्वसंवेद्यःपरमानंदरूपोरसास्वादोदशरूपाणांफलंनपुनरितिहासादिवत्त्रिवर्गादिव्युत्पत्तिमात्रमितिदर्शितं।नमइतिसोल्लुंठं।१।नाट्यानांलक्षणंसंक्षिपामीत्युक्तंकिंपुनर्नाट्यमित्याह।अवस्थानुकृतिर्नाट्यमिति।काव्योपनिबद्धरामादिधीरोदात्ताद्यवस्थानुकारश्चतुर्धाभिनयेनतादात्म्यापत्तिर्नाट्यं।रूपंदृश्यतयोच्यते।तदेवनाट्यंदृश्यमानतयारूपमित्युच्यतेनीलादिरूपवत्।रूपकंतत्समारोपादितिनटेरामाद्यवस्थारोपेणवर्तमानत्वा

रूत्तेपकंमुखचंद्रादिवदित्येकस्मिन्नर्थेवर्तमानस्यशब्दत्रयस्यैंद्रःशक्रःपुरंदरइतिवत्प्रवृत्तिनिमित्तभेदोदर्शितः।द
मि शधैवरसाश्रयंति॥रसानाश्रित्यवर्तमानंदशप्रकारमेवेत्यवधारणंशुद्धाभिप्रायेणनाटिकायाःसंकीर्ण
त्वेनवक्षमाणत्वात्॥७॥तानेवदशप्रभेदानुद्दिशति॥नाटकंसप्रकरणंभाणःप्रहसनंडिमः।व्यायो
गसमवकारौवीथ्यंकेहामृगाइति॥ननुडोंबीश्रीगदितंभाणोभाणीप्रस्थानरासकाः॥काव्यंचस
प्तनृत्यस्यभेदास्युस्तेपिभाणवदीतिरूपकांतराणामपिभावादवधारणानुपपत्तिरित्याशंक्याह॥
अन्यद्भावाश्रयंनृत्यमितिरसाश्रयान्नाट्याद्भावाश्रयंनृत्तमन्यदेव।तत्रभावाश्रयमितिविषयभे
दात्॥लोकेपिरंगंप्रेक्षणीयकमितिव्यवहारान्नाटकादेरन्यन्नृत्तंतद्भेदत्वात्॥श्रीगदितादेरव
धारणोपपत्तिःनाटकादिचरसविषयं।रसस्यपदार्थीभूतविभावादिसंसर्गात्मकवाक्यार्थ
रूपत्वाद्वाक्यार्थाभिनयात्मकत्वंरसाश्रयमित्यनेनदर्शितं॥नाट्यमितिचनटअव[illegible]स्पंद
नइतिनटेःकिं[illegible]चिच्चलनार्थत्वात्सात्त्विकबाहुल्यंअतएवतत्कारीषुनटइतिव्यपदेशः॥ २

3

यथाचगात्रविक्षेपार्थत्वेसमानेप्यनुकारात्मकत्वेननृत्यादन्यन्नृत्तं।तथावाक्यार्थाभिनयात्मकान्नाट्यात्पदार्थाभि
नयात्मकमन्यदेवनृत्यादन्यन्नृत्तं।।नृत्तस्युत्यासुदयन्ति।।नृत्तंताललयाश्रयमिति।।तालश्चच्चत्पुटादिः।।लयःद्रुतादिः।
तन्मात्रापेक्षोगविक्षेपोभिनयशून्योनृत्तमिति।।अनंतरोक्तंद्वितयंव्याचष्टे।।आद्यःपदार्थाभिनयोमार्गोदेशीतथा
परं।।नृत्यंपदार्थाभिनयात्मकंमार्गइतिप्रसिद्धं।।नृत्तंचदेशीति।।९।।द्विविधस्यापिद्वैविध्यमाह।।मधुरोद्धत
भेदेनतद्द्वयंद्विविधंपुनः।।लास्यताण्डवरूपेणेति।।सुकुमारद्वयमपिलास्यं।।उद्धतंद्वितयमपिताण्डव
मिति।।प्रसंगोक्तस्योपयोगंदर्शयति।।नाटकाद्युपकारकमिति।।तच्चद्वयंनाटकाद्युपकारकं।।रस
स्यक्वचिदवान्तरपदार्थाभिनयेन।।नृत्तस्यचशोभाहेतुत्वेननाटकादावुपयोगइति।।१०।।अनुकारा
त्मकत्वेनरूपकाणामभेदात्किंकृतोभिदइत्याशंक्याह।।वस्तुनेतारसस्तेषांभेदकइति।।इतिवृत्तभे
दान्नायकभेदाद्रसभेदाद्रूपकाणामन्योन्यभेदइति।।वस्तुभेदमाह।।वस्तुचद्विधेति।।कथमि
त्याह।।तत्राधिकारिकंमुख्यमंगंप्रासंगिकंविदुरिति।।प्रधानभूतमाधिकारिकं।।यथारामायणेरा
मसीतावृत्तांतः।।तदंगभूतंप्रासंगिकं।।यथातत्रैवविभीषणसुग्रीवादिवृत्तांतइति।।११।।निरुक्त्या
आधिकारिकंलक्षयति।।अधिकारःफलं।।स्वाम्यमधिकारीचतत्प्रभुः।।तन्निर्वर्त्यमभिव्यापिवृ

ते॥ स्यादाधिकारिकमिति॥ फलस्वस्वामिसंबंधोधिकारः॥ फलस्वामी चाधिकारी॥ तेनाधिकारेणावाभिनि
र्वृत्तं॥ फलपर्यंततानीयमानमभिनिर्वृत्तमाधिकारिकं॥ ५२॥ प्रासंगिकमिति व्याचष्टे॥ प्रासंगिकं परार्थस्य
स्वार्थो यस्य प्रसंगतइति॥ यस्येति वृत्तस्य परप्रयोजनस्य सतोपि प्रसंगात्स्वप्रयोजनसिद्धिस्तत्प्रासंगिक
मितिवृत्तं प्रसंगनिर्वृत्तेः॥ प्रासंगिकमपि पताकाप्रकरीभेदाद्द्विविधमित्याह॥ सानुबंधं पताकाख्यं प्र
करीतु प्रदेशभाक्॥ दूरं यदनुवर्त्तते प्रासंगिकं सा पताकेवाऽसाधारणनायकचिन्हवत्तदुपकारित्वात्
पताकासुग्रीवादिवृत्तांतवत्॥ यदल्पं सा प्रकरी श्रमणादिवृत्तांतवत्॥ ३॥ पताकाप्रसंगेन पता
कास्थानकंव्युत्पादयति॥ ॥ प्रस्तुतागंतुभावस्य वस्तुनोन्योक्तिसूचकं॥ पताकास्थानकंतुल्यसं
विधानविशेषणं॥ प्राकरणिकस्य भाविनोऽर्थस्य सूचकरूपं पताकावद्भवतीति पताकास्थानकंत
च्च तुल्येतिवृत्ततया तुल्यविशेषणतया च द्विप्रकारकमन्योक्तिसमासोक्तिभेदात्॥ यथा रत्नावल्यां॥
यातोऽस्मि पद्मवदने समयो ममैष सुप्ता मयैव भवती प्रतिबोधनीया॥ प्रत्यायनामयमितीव सरोरुहि
ण्याः सूर्योऽस्तमस्तकनिविष्टकरः करोति॥ यथा च॥ तुल्यविशेषणतया॥ उद्दामोत्कलिकां विपाडु
ररुचं प्रारब्धजृंभां क्षणादायासं श्वसनोद्गमैरविरलैरातन्वतीमात्मनः॥ अद्योद्यानलतामिमां समदनां

नारीभिर्वान्यां ऋचेपनयुक्तोपचितपाठ्यधुनिमुखं वेद्याः करिष्याम्यहं ॥ १ ॥ एवंत्वाधिकारिकद्विविधप्रा
संगिकभेदात्रिविधस्यापि त्रैविध्यमाह ॥ प्रख्यातोत्पाद्यमिश्रत्वभेदात्रेधापि तत्त्रिधा ॥ प्रख्यातमि
तिहासादेः उत्पाद्यं कविकल्पितं ॥ मिश्रं च संकराभ्यां दिव्यमर्त्यादिभेदतः ॥ इति निगदव्याख्यातं ॥
तस्येतिवृत्तस्य किं फलमित्याह ॥ कार्यं त्रिवर्गस्तच्छुद्धमेकानेकानुबंधि च ॥ धर्मार्थकामाः फलं ॥
तच्च शुद्धमेकैकमेकानुबंधं द्व्यनुबंधं वा ॥ तत्साधनं व्युत्पादयति ॥ स्वल्पोद्दिष्टस्तु तद्धेतुर्बीजं विस्ता
र्यनेकधा ॥ स्तोकोद्दिष्टः कार्यसाधकः पुरस्तादनेकप्रकारं विस्तारी हेतुविशेषो बीजवद्बीजं ॥
यथा रत्नावल्यां वत्सराजस्य रत्नावलीप्राप्तिहेतुरनुकूलदैवो यौगंधरायणव्यापारो विष्कंभके
न्यस्तः ॥ यौगंधरायणः ॥ कः संदेह ॥ द्वीपादन्यस्मादपीति पठती त्यादिना प्रारंभेस्मिन्स्वामिनो
वृद्धिहेतावित्यनेन ॥ यथा च वेणीसंहारे द्रौपदीकेशसंयमनहेतु भीमक्रोधोपचितो युधिष्ठि
रोत्साहो बीजमिति ॥ यच्च महाकार्यावांतरकार्यहेतुभेदादनेकप्रकारमिति ॥ ५१ ॥ अवांतर
बीजस्य संज्ञांतरमाह ॥ ॥ अवांतरार्थविच्छेदे बिंदुरच्छेदकारणं ॥ यथा रत्नावल्यां ॥ अवांत
रप्रयोजनानंगपूजापरिसमाप्तौ कथार्थविच्छेदे सत्यनंतरकार्यहेतुरुदयनस्येंदोरिवोद्वी

क्षने॥सागरिका॥कलाकहं एसोउदणणरिंदोजस्सअहंतादेणदिण्णाइत्यादि॥बिंदुर्जलेतैलबिंदुवत्प्रसारित्वा
त्॥तदानींपताकाद्यंप्रसंगाद्व्युत्क्रमोक्तंक्रमार्थमुपसंहरन्नाह॥बीजाबिंदुपताकाख्यकाप्रकरीकार्यलक्ष
णाः॥अर्थप्रकृतयःपंचताएताःपरि॥कीर्त्तिताः॥अर्थप्रकृतयः॥प्रयोजनसिद्धिहेतवः॥अन्यदवस्था
पंचकमाह॥अवस्थाःपंचकार्यस्यप्रारब्धस्यफलार्थिभिः॥आरंभयत्नप्राप्त्याशानियताप्तिफलाग
मः॥ ॥यथोद्देशंलक्षणमाह॥औत्सुक्यमात्रमारंभःफललाभायभूयसे॥इदमहंसंपादयामीत्यध्यवसा
यमात्रमारंभउच्यते॥यथारत्नावल्यां॥प्रारंभेस्मिन्स्वामिनोवृद्धिहेतौदैवेचेत्थंदत्तहस्तावलंबेइत्यादि
ना॥इत्यनेनधीरललितत्वंसाचिवायत्तसिद्धेर्वत्सराजस्यकार्यारंभोयौगंधरायणमुखेनदर्शितः॥१७॥
॥१८॥१९॥अथप्रयत्नः॥प्रयत्नस्तुतदप्राप्तौव्य॥पारोतित्वरान्वितः॥तस्यफलस्याप्राप्तौउपाययोजनादि
रूपश्चेष्टाविशेषःप्रयत्नः॥यथारत्नावल्यां॥आलेख्याभिलेखनादिर्वत्सराजसमागमोपायः॥
सागरिकाः॥तथावि णत्थिअण्णोदंसणोवाओत्तिजहतहविआलिहिअजहासमीहिदंकरिस्संइत्या
दिनाप्रतिपादितः॥प्राप्त्याशामाह॥उपायापायशंकाभ्यांप्राप्त्याशाप्राप्तिसंभवः॥उपायस्यअपा
यस्यशंकायानवभावादनिर्धारितैकांतफलप्राप्तिःप्राप्त्याशायथारत्नवल्यां॥तृतीयेंके॥वेषपरिवर्त्त ॥५॥

7

नाभिसरणादौसमागमोपायेसन्निवासवदत्तालक्षणापायशंका॥ विदूषकः एव्वंजदिप्पसौ अपाल्लवादावल्लीविय आगच्छिअ अण्णदोणोणइस्सदिवासवदत्ताइस्याँदिनार्निनृत्यानु॥ अनिर्धारितैकांतासमागमप्राप्तिरुक्ता॥ २०॥ नियताप्तिमाह॥ अपायाभावतःप्राप्तिर्नियताप्तिःसुनिश्चिता॥ अपायाभावादवधारितैकांताफलप्राप्तिर्नियताप्तिरिति॥ यथारत्नावल्यां॥ विदूषकः॥ साम्मरिस्आउण्दुःकरंजोविस्साहिद्दस्सपकम्म्यकिंणुक्खुअंएत्थचिंतेमीसंननरं॥ राजा॥ देवीप्रसादनंमुक्त्वानान्यमत्रोपायंपश्यामी सनंतराकार्यबिंदुनाअनेनदेवीलक्षणापायस्यप्रसादनेननिवारणान्नियताफलप्राप्तिःसूचिता॥ फलयोगमाह॥ समग्रफलसंपत्तिःफलयोगोयथोदितः॥ यथारत्नावल्यां॥ रत्नावलीलाभाच्चक्रवर्तित्वावाप्तिरिति॥ २१॥ संधिलक्षणमाह॥ अर्थप्रकृतयः पंचपंचावस्थासमन्विताः॥ यथासंख्येनजायंतेमुखाद्याःपंचसंधयः॥ अर्थप्रकृतीनांपंचानांयथासंख्येनावस्थाभिःपंचभिर्योगाद्यथासंख्येनैवमुखाद्याःपक्ष्यमाणाःपंचसंधयोजायंते॥ २२॥ संधिसामान्यलक्षणमाह॥ ॥ अंतरैकार्थसंबंधःसंधिरेकान्वयेसति॥ एकेनप्रयोज[illegible]नेनान्वितानांकथांशानामवांतरैकप्रयोजनेनसंबंधःसंधिः॥ केपुनस्तेसंधयः॥ मुखप्रतिमुखंगर्भःसावमर्शोपसंहृतिः॥ २३॥ यथोद्देशंलक्षणमाह॥ मुखबी

॥ ५॥

जसमुत्पत्तिर्ना संभवः॥ अंगानि द्वादशैतस्य बीजारंभमन्वयात्॥ बीजानां समुत्पत्तिरनेकप्रकारप्रयोजनरसहेतुमुखसंधिरिति व्याख्येयं॥ तेन त्रिवर्गफलप्रहसनादौ रसोत्पत्तिहेतोरेव बीजत्वमिति॥ अस्य च बीजारंभार्थयुक्तानि द्वादशांगानि भवंति॥ २४॥ तान्याह॥ उपक्षेपः परिकरः परिन्यासो विलोभनं॥ युक्तिः प्राप्तिः समाधानं परिभावना॥ उद्भेदभेदकरणान्यन्वर्थान्यथ लक्षणं॥ एषां स्वसंज्ञाव्याख्यातानामपि सुखार्थं लक्षणं क्रियते॥ बीजन्यास उपक्षेपः॥ यथा रत्नावल्यां॥ नेपथ्ये॥ द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यंतात्॥ आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः इत्यादिना यौगंधरायणो वत्सराजस्य रत्नावलीप्राप्तिहेतुभूतमनुकूलदैवं स्वव्यापारं बीजत्वेनोपक्षिप्तवानित्युपक्षेपः॥ परिकरमाह॥ तद्बाहुल्यं परिक्रिया॥ यथा तत्रैव अन्यथा क्व सिद्धादेशप्रत्ययप्रार्थितायाः सिंहलेश्वरदुहितुः समुद्रे प्रवहणभंगमग्नायाः फलकासादनमित्यादिना सर्वथा स्पृशंति स्वामिनमभ्युदया इत्यंतेन बीजोत्पत्तेरेव बहूकरणात्परिकरः॥ २५॥ २६॥ परिन्यासमाह॥ तन्निष्पत्तिः परिन्यासः॥ यथा तत्रैव प्रारंभेऽस्मिन्नित्यादिना यौगंधरायणः॥ स्वव्यापारे दैवयोर्निष्पत्तिमुक्तवानिति परिन्यासः॥ विलोभनमाह॥ गुणाख्यानाद्विलोभनं॥ यथा रत्नावल्यां॥ अस्तापास्तसमस्तभासि नभसः पारं प्रयाते रवावास्थानीं समये समं नृपज ॥ ५॥

नःसायत्नेनसपत्नतु॥ संप्रत्येषसरोरुहद्युतिमुषः पादास्तवासेवितुंप्रीत्युत्कर्षकृतोदृशामुदयनस्येंदोरि
वोद्वीक्षते॥ इतिवैतालिकमुखेनचंद्रतुल्यवत्सराजगुणवर्णनंयथासागरिकाया॥ समागमहेत्वनुरागवी
जानुगुण्येनबीजविलोभनाद्विलोभनमिति॥ यथाचवेणीसंहारे॥ मंथायस्तार्णवांभःप्लुतकुहरच
लन्मंदरध्वानधीरः॥ कोणाघातेषुगर्जत्प्रलयघनघटान्योन्यसंघट्टचंडः॥ कृष्णाक्रोधाग्रदूतः
कुरुकुलनिधनोत्पातनिर्घातवातः केनास्मत्सिंहनादप्रतिरसितसखोदुंदुभिःताडितोयमित्या
दिनायकेनदुंदुभिशब्दस्यनेनद्रौपद्याविलोभनात्विलोभनमिति॥ अथयुक्तिः॥ संप्रधारणमर्थानांयु
क्तिः॥ यथारत्नावल्यां॥ मयापिएनांदेवीहस्तेसगौरवंनि क्षिपतायुक्तमेवानुष्ठितं॥ उक्तंचमया
यथाबाभ्रव्यः कंचुकीसिंहलेश्वरामात्येनवसुभूतिनासहकथंकथमपिसमुद्रादुत्ती
र्यकोशलोच्छित्तयेगतस्यरुमण्वतोमिलितइत्यनेनसागरिकायाअंतःपुर
गतायावत्सराजस्यमुखेनदर्शनादिप्रयोजनाद्बाभ्रव्यसिंहलेश्वरामात्ययोःस्वना
यकसमागमनप्रयोजनत्वेनावधारणाद्युक्तिरिति॥ अथप्राप्तिः॥ प्राप्तिःसुखा
गमइति॥ यथावेणीसंहारे॥ चेटी॥ भट्टिणि॥ परिकुविदोविअकुमारोलक्खीअदि

॥ ६ ॥

इत्युपक्रमे भीमः॥ मथ्नामि कौरवशतं समरे न कोपाद्दुःशासनस्य रुधिरं न पिबाम्युरस्तः॥ संचूर्णयामि गदया न सुयोधनोरू संधिं करोतु भवतां नृपतिः पणेन॥ द्रौपदी श्रुत्वा सहर्षं णाह॥ असुदपुव्वं क्खु एदं वअणं ता पुणो पुणो भण॥ इत्यनेन भीमक्रोधबीजान्वयेनैव सुखप्राप्त्या द्रौपद्याः प्राप्तिरिति॥ यथा रत्नावल्यां॥ सागरिका श्रुत्वा सहर्षं परिवृत्य॥ सस्पृहं पश्यन्ती॥ कधं अअं सो राआ उदअणो जस्स अहं तादेण दिण्णा॥ ता परप्पेसणदूसिदं पि मे जीविदं एदस्स दंसणेण बहुमदं संवुत्तं इति सागरिकायाः सुखागमात्प्राप्तिरिति॥ ७॥ अथ समाधानं॥ बीजागमः समाधानमिति॥ यथा रत्नावल्यां॥ वासवदत्ता॥ तेण हि उवणेहि मे पूजोवअरणाइं॥ सागरिका॥ भट्टिणि एदं सव्वं सज्जं॥ वासवदत्ता निरूप्य॥ आत्मगतं॥ अहो पमादो परिअणस्स जस्स एव्व दंसणपहादो पअत्तेण रक्खीअदि तस्स ज्जेव्व कहं दिट्ठिगोअरं आगदा ता एव्वं दाव॥ प्रकाशं॥ हञ्जे साअरिए कीस तुमं अज्ज मअणमहूसवपराहीणे परिअणे सारिअं उज्झिअ इहागदा ता तहिं ज्जेव्व गच्छ इत्युपक्रमे॥ सागरिका॥ स्वगतं॥ सारिआ दाव मए सुसंगदाहत्थे समप्पिदा। पेक्खिदुं अ

॥ ६ ॥

छिमेको दूहल्लं नात्मल्लाभस्त्रिवदापो भ्रियसंस्तइत्यनेन वासदत्तया रत्नावलीवत्सराजयोर्दर्शनं प्र
तीकारात्॥ सागरिकायाः सुसंगताहस्तार्पणेनालक्षितप्रेक्षणेन च वत्सराजसमागमहेतोर्बी
जस्योपादानात्समाधानमिति॥ यथा वेणीसंहारे भीमः॥ भवतु पाञ्चालराजतनये श्रूयता
मचिरेणैव कालेन॥ चंचद्भुजभ्रमितचंडगदाभिघातसंचूर्णितोरुयुगलस्य सुयोधन
स्य॥ स्त्यानावनद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि भीमः॥ इत्यनेन
वेणीसंहारहेतोः क्रोधबीजस्य पुनरुपादानात्समाधानमिति॥ अथ विधानं॥ विधानं
सुखदुःखकृत्॥ यथा मालतीमाधवे प्रथमेंके माधवः॥ यांत्या मुहुर्वलितकंधरमान
नं तदावृत्तवृंतशतपत्रनिभं वहंत्या॥ दिग्धोमृतेन च विषेण च पक्ष्मलाक्ष्या गाढं नि
खात इव मे हृदये कटाक्षः॥ यद्विस्मयस्तिमितमस्तमितान्यभावमानंदमंदममृतप्लु
वनादिवाभूत्॥ तत्संनिधौ तदधुना हृदयं मदीयमंगारचुंबितमिव व्यथमानमास्ते॥ इद
मप्युदाहरणं भवति॥ इत्यनेन मालत्यवलोकनस्य सानुरागस्य संगमहेतोर्बीजस्यानुगुण्ये
नैव माधवस्य सुखदुःखकारित्वाद्विधानमिति॥ यथा वेणीसंहारे द्रौपदी॥ णाह पुणोवि

नुत अहमा अष्ठि असमासमिदध्या। भीमः नुनु पांचालराजतनये किमद्याप्यलीका
खासनया। भूयः परिभवक्लांतिलज्जाविधुरिताननं। अनिःशेषितकौरव्यं नपश्य
सि वृकोदरं। इति संग्रामस्य सुखदुःखहेतुत्वाद्विधानमिति। अथ परिभावना॥
परिभावोद्भुतावेश इति। यथा रत्नावल्यां। सागरिका दृष्ट्वा सविस्मयं। कथं पच्च
क्खो एव्व अणंगो पूअं पडिच्छेदि। ता अहं पि इह ट्ठिदा जेव्व पूअइस्सं इत्यनेन
वत्सराजस्य अंगरूपतया पह्वानात्॥ अनंगस्य प्रत्यक्षस्य पूजाग्रहणस्य लो
कोत्तरत्वाद्भुतरसावेशः परिभावना। यथा हवेणीसंहारे द्रौपदी॥ किं दाणिं
एसो पलअजलहरत्थणिदमंसलो खणे खणे समरदुंदुहि ताडिअदि॥
इत्यलौकोत्तरसमरदुंदुभिविस्मयरसावेशा। द्रौपद्याः परिभावना। अ
थोद्भेदः। उद्भेदो गूढभेदनमिति। यथा रत्नावल्यां। वत्सराजस्य कुसुमायुध
व्यपदेशेन गूढस्य वैतालिकवचसा स्तापास्तेत्यादिना॥ उदयनस्येंदोरिवसं
लेन बीजानुगुण्येनैव उद्भेदनादुद्भेदः। यथा च वेणीसंहारे॥ आर्याः किमि

X3

दानीमध्यचस्यन्तिगुरैरुरूपक्रमे॥ नेपथ्ये॥ यसत्यसव्रतभंगभीरुमनसा यत्नेन मंदीकृतं यद्विस्मर्तुमपीहि
तंशमवतां शांतिं कुलस्येच्छता॥ तद्द्यूतारणिसंभृतं नृपसुताकेशांबराकर्षणैः क्रोधज्योतिरिदं
महत्कुरुवने यौधिष्ठिरं जृंभते॥ भीमः सहर्षं जृंभतां॥ संप्रत्यनुपहतप्रसरमार्यस्य क्रोधज्योति
रिदं तेनच्छन्नस्योद्भेदो पाचालीकेशसंयमनहेतोर्युधिष्ठिरक्रोधबीजस्योद्भेदनादुद्भेदः॥ २८॥
अथ करणं॥ करणम प्रकृतारंभः॥ यथा रत्नावल्यां॥ णमो दे कुसुमाउह॥ अमोहदंसणो मे भ
विस्ससिस्सदि छंजे पेक्खिस्सद वंता जाव अण्णेण कोवि मंये अवदिदा वगमिस्सामि येनेनानंतरं कार्यम
कृतानि विघ्नदर्शनारंभकरणान्नूकरणं॥ यथावेणीसंहारे॥ भीमः तत्साचलि गच्छामो वयमिदानीं कु
रुकुलक्षयायद्दति॥ सहदेवः॥ आर्य गच्छाम इदानीं गुरुजनानुज्ञाता आत्मविक्रमानुरूपमाचरितुमित्य
नचानंतरां कप्रस्तूयमानसंग्रामारंभकरणात्करणमिति॥ सर्वत्रोद्देशनिर्देशयोर्वैपरीत्यं क्रियाक्रमस्या
विवक्षितत्वादिति॥ अथ भेदः॥ भेदः प्रोत्साहना मतेति॥ यथा वेणीसंहारे द्रौपदी णाह मा क्खु
जण्णसेणीपरिहवुद्दीविदकोवाणला अणवेक्खिदसरीरा परिकामिस्सध जदो अप्पमत्तसं
चरणीआइं रिउबलाइं सुणीअंति॥ भीमः॥ अयि सुक्षत्रियो अन्योन्यास्फालभिन्नद्विपरुधि
रवसासांद्रमस्तिष्कपंके मग्नानां स्यंदनानामुपरिकृतपदन्यासविक्रांतपत्तौ॥ स्फीतासृक्पानगो

छिद्रसद्भावशिखान्तूर्यन्त्यस्य कबंधेसंयोगेकार्णवाम्भः पयसिविचरितुंपंडिताः पांडुपुत्राः ॥ इत्यनेनविषण्णायाद्रौपद्याःक्रोधोत्साहबीजानुगुण्येनैवभीमोत्साहनाद्भेद इति ॥ एतानिचद्वादशमुखांगानिबीजारंभद्योतकानिसाक्षात्पारंपर्येणचाविधेयानि ॥ एतेषामुपक्षेपपरिकरपरिन्यासयुक्त्युद्भेदसमाधानानामवश्यंभावित्वमिति ॥ अथसांगप्रतिमुखसंधिमाह ॥ लक्ष्यालक्ष्यइवोद्भेदस्तस्यप्रतिमुखंभवेत् ॥ बीजप्रयत्नानुगमादंगास्यत्रयोदश ॥ तस्यबीजस्यकिंचिल्लक्ष्यःकिंचिदलक्ष्यइवोद्भेदः ॥ प्रकाशनंतत्प्रतिमुखं ॥ यथारत्नावल्यांद्वितीयेंकेवत्सराजस्यसागरिकासमागमहेतोरनुरागबीजस्यप्रथमांकोपक्षिप्तस्यसुसंगताविदूषकाभ्यांज्ञायमानतया । किंचिल्लक्ष्यस्यवासवदत्तयाचित्रफलकवृत्तांतेनाकिंचिदुन्नीयमानस्यदृश्यादृश्यरूपउद्भेदः । प्रतिमुखसंधिरिति । वेणीसंहारेपिद्वितीयेंकेभीष्मादिवधेनलक्ष्यस्यकर्णाद्यवधाच्चालक्ष्यस्यक्रोधबीजस्योद्भेदः । सहभृत्यगणंसबांधवंसहमित्रंससुतंसहानुजं । स्वबलेननिहंतिसंयुगेचिरात्सा उसुतःसुयोधनमित्यादिभिः ॥ दुःशासनस्यहृदयक्षतजांबुपानेदुर्योधनस्यचयथागदयोरुभंगे । तेजस्विनांसमरमूर्द्धनिपांडवानांज्ञेयाजयद्रथवधेपितथाप्रतिज्ञा इत्येवमादिभिरुद्भेदः । प्रतिमुखसंधिरिति । अस्यचपूर्वांकोपक्षिप्तबिंदुरूपबीजप्रयत्नार्थानुगतानित्रयोदशांगानिभवंति । ८

तान्याह । विलासःपरिसर्पश्चविधूतंशमनर्मणी । नर्मद्युतिःप्रगमनंनिरोधःपर्युपासनं । वज्रंपुष्पमुपन्यासो

वर्णसंहार इत्यपि॥२९३०३१॥ यथोद्देशं लक्षणमाह। रत्यर्थेहा विलासः स्यादिति। यथा रत्नावल्यां। सागरिका। हिअअ अपसी
अ किं इमिणा आयासमात्तफलेण दुल्लहजणपत्थणाणुबंधेणेत्युपक्रमे तथा आलेहगदं तं जणं कदुय जधासमी
हिदं करिस्सं तह वि तस्स णत्थि अण्णो दंसणोवाओत्ति इत्येतैर्वत्सराजसमागमरतिचित्रादिजन्मामभ्युदितरूपसा
गरिकायाश्चेष्टा प्रयत्नोनुरागबीजानुगो विलास इति। अथ परिसर्पः। दृष्टनष्टानुसर्पणं परिसर्प इति। यथा वेणी
संहारे कंचुकीयो यमुद्धतेषु बलवत्सु अथवा किं बलवत्सु वासुदेवसहायेषु अरिषु चाप्यंतःपुरस्कृत्वमनुभव
ति। इदमपरमयथातथं स्वामिनश्चेष्टितं। आचार्यग्रहणादकुंठपरशोर्ल्लस्यापि जेता मुनेस्तातपादस्य न पांडु
सूनुभिर्यं भीष्मः शरैः शायितः। प्रौढानेकधनुर्धरारिविजयश्रांतस्य चैकाकिनो बालस्यायमरातिलूनधनुषः
प्रीतोभिमन्योर्वधात् इत्येतेन भीष्मादिवधदृष्टस्याभिमन्युवधान्नष्टस्य बलवत्तापांडवानां वासुदेवसहायानां
संग्रामलक्षणबिंदुप्रयत्नान्वयेन कंचुकीमुखेन बीजस्यानुसर्पणं परिसर्प इति। यथा रत्नावल्यां सागरिकावच
न चित्रदर्शनाभ्यां बीजस्य दृष्टनष्टस्य कासौ कासा विसा दिना वत्सराजेनानुसरणात्परिसर्प इति। अथ विधू
तं। विधूनं स्यादरतिरिति। यथा रत्नावल्यां सागरिका। सहि हिअअं मे संतावो बाधेदि। सुसंगता। दीर्घिकातो न
लिनीनि मृणालिकाश्चानीयास्या अंगे ददाति। सागरिका। ता निक्खिपंती सहि अवणेहि एदाहिं अज्झारणेअ

अत्ताणंअं आयासेसिणंभणामि। दुल्लहजणानुराओलज्जागुरुओपरवसोअप्पा।।पिअसहि विसमंपेम्मंमरणंसरणं
णवरमेक्कं। इत्यनेन सागरिकाबीजान्वयेनरतोपचारात् विधूननम्। विधूतं यथा वेणीसंहारे। भानुमत्याः दुःस्वप्नदर्श
नेनदुर्योधनस्यानिष्टशंकया पांडवविजयशंकया चारतेर्विधूतमिति।। अथशमः। तच्छमः शमइति। तस्याअरते
रुपशमः शमः।। यथारत्नावल्यां।। राजा निर्वर्ण्य वयस्यानया लिखिताहमिति।। यत्सत्यमात्मन्यपि मे बहुमानस्त
त्कथंनपश्यामि। सुसंगता सखि सागरिका। आत्मगतं हिअअसमस्ससमस्सस रमणोरहाविणदेएत्तिअंभूमिंगदा।। इ
ति किंचिदरसूपत्रामाछमरति।।४२।। अथनर्मपरिहासवचोनर्म।। यथारत्नावल्यांसुसंगता। सहि जस्स
किदे तुमं आगदा सो अअं पुरथो विचइ।। सागरिका सासूयं सुसंगदे कस्स किचे अहं आगदा।। सुसंगता।। अ वेणी
पि अप्पसंकिदे णं चित्तफलअस्स।। नागे८ एदमित्यनेन बीजान्वितं परिहासवचनं नर्म। यथा संहारे दुर्यो
धनः।। चेटीहस्तादर्घपात्रमादाय देव्याः समर्पयाति। पुनर्भानुमती अर्घं दत्वा हला उवणेहि मे कुसुमां
इंजाव आवराणं विदेवदाणं सवरिअं णिव्वत्तेमि।। हस्तौ प्रसारयति।। दुर्योधनः। पुष्पाण्युपनयति भानु
मत्याः तस्य स्पर्शजातकंपाया हस्तात्कुसुमाणि पतंती। त्यनेन नर्मणा दुःस्वप्नदर्शनोपशमार्थदेवतापूजावि
घ्नकारिणा बीजोद्घाटनात् परिहासस्य प्रतिमुखांगत्वं युक्तमिति।। अथनर्मद्युतिः धृतिर्लज्जाद्युति

रूपकाणामन्योन्यभेदसिद्ध्येवस्तुभेदंप्रतिपाद्येदानींनायकभेदः प्रतिपाद्यते।नेताविनीतोमधुरस्त्यागीदक्षःप्रि
यंवदः।रक्तलोकःशुचिर्वाग्मीरूढवंशःस्थिरोयुवा।बुध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः।शूरोदृढश्च
तेजस्वीशास्त्रचक्षुश्चधार्मिकः॥नेतानायकोविनयादिगुणसंपन्नोभवतीतितत्रविनीतोयथा॥
यद्ब्रह्मवादिभिरुपासितवंद्यपादेविद्यातपोव्रतनिधौतपतांवरिष्ठे।दैवात्कृतस्त्वयिमयाविन
यापचारस्तत्रप्रसीदभगवन्नयमंजलिस्ते॥मधुरः प्रियदर्शनः यथा॥रामरामनयनाभिरामता
माशयस्यसदृशींसमुद्वहन्॥अप्रतर्क्यगुणरामणीयकः सर्वथैवहृदयंगमोसिमे॥त्यागीस
र्वस्वदायकः यथा॥त्वचंकर्णःशिबिर्मांसंजीवंजीमूतवाहनः ददौदधीचिरस्थीनिनास्त्यदे
यंमहात्मनां॥दक्षः क्षिप्रकारीयथा॥स्फूर्जद्वज्रसहस्रनिर्मितमिवप्रादुर्भवत्यग्रतोरामस्य
त्रिपुरान्तकृद्दिविषदांतेजोभिरिद्धंधनुः॥शुंडारः कलभेनयद्वदचलेवत्सेनदोर्दंडकस्तस्मि
न्नाहितएवगर्जितगुणंकृष्टंचभग्नंचतत्॥प्रियंवदः प्रियभाषीयथा३ अंक १ पु २ अधः पंक्ति
पासून पान ३० अंक १ पुष्ट पंक्ति ६ पर्यंतं ज्ञाणावा॥निश्चिंतोधीरललितःकलासक्तःसुखीमृदुः॥
सचिवादिसंविहितयोगक्षेमत्वाच्चिंतारहितः॥अतएवगीतादिकलाविशिष्टोभोगप्रव

णत्वः॥शृंगारप्रधानत्वाच्चसुकुमारसत्वारौचोमृदुरिति॥ललितोयथा॥राज्यंनिर्जितशत्रु
योग्यसचिवेन्यस्तःसमस्तोभरःसम्यक्पालनलालिताःप्रशमिताशेषोपसर्गाःप्रजाः॥प्र
द्योतस्यसुतावसंतसमयस्त्वंचेतिनाम्नाधृतिंकामःकाममुपैत्वयंममपुनर्मन्येमहानुत्सवः॥
अथशांतः॥सामान्यगुणयुक्तश्चधीरशांतोद्विजादिकइतिविनयादिनेतृसामान्यगुणयो
गी॥धीरशांतोद्विजादिकइतिविप्रवणिक्सचिवादीनांप्रकरणनेतृणामुपलक्षणं॥विवक्षि
तंचैतत्॥तेननैश्चिंत्यादिगुणसंभवेपिविप्रादीनांशांततैवनलालित्यं॥यथामालतीमाध
वेमृच्छकटिकादौमाधवचारुदत्तादिः॥ततउदयगिरेरिवैकएवस्फुरितगुणद्युतिसुंदरः
कलावान्॥इहजगतिमहोत्सवस्यहेतुर्नयनवतामुदियायबालचंद्रः॥इत्यादि॥यथा
च॥मखशतपरिपूतंगोत्रमुद्भासितंयत्सदसिनिविडचैत्यब्रह्मघोषैःपुरस्तात्॥मम
निधनदशायांवर्तमानस्यपापैस्तदसदृशमनुष्यैर्घुष्यतेघोषणायां॥अथधीरोदात्तः
॥महासत्वोतिगंभीरःक्षमावानविकत्थनः॥स्थिरोनिगूढाहंकारोधीरोदात्तोदृढव्र

तः॥महासत्वःशोकक्रोधाद्यनभिभूतान्तःसत्वोमहासत्वः अविकत्थनोऽनात्मश्लाघ्यः निगु
ढाहंकारोविनयछन्नावलेपः॥दृढव्रतोंगीकृतनिर्वाहकः॥धीरोदात्तोयथाजीमूतवा
हनः सिरामुखैः स्यंदतएवरक्तमद्यापिदेहेममामांसमस्ति॥नतृप्तिन्नपश्यामितवैव
तावत्किंभक्षणात्त्वंविरतोगरुत्मन्॥यथाचरामप्रति॥आहूतस्याभिषेकायवि
सृष्टस्यवनायच॥नमयालक्षितस्तस्यस्वल्पोप्याकारविभ्रमः॥यच्च॥केषांचित्स्थै
र्यादीनांसामान्यगुणानामपिविशेषलक्षणेक्वचित्संकीर्त्तनं॥तत्तेषांतत्राधिक्य
प्रतिपादनार्थंननुकथंजीमूतवाहनादिर्नागानंदादावुदात्तइत्युच्यते॥औदात्यंहि
नामसर्वोत्कर्षेणवृत्तिः॥तच्चविजिगीषुत्वएवोपपद्यते॥जीमूतवाहनस्तुनिर्जिगी
षुतयाकविनैवप्रतिपादितः॥तिष्ठन्भातिपितुःपुरोभुवियथासिंहासनेकिंतथा
यत्संवाहयतःसुखंहिचरणौतातस्यकिंराजके॥किंभुक्तेभुवनत्रयेधृतिरसौभुक्तो
ज्झितेयागुरोरायासःखलुराज्यमुज्झितगुरोस्तंनास्तिकश्चिद्गुणः॥इत्यादिना॥पित्रो

२

र्विधातुं तु शुश्रूषां त्यक्त्वैश्वर्यं क्रमागतं ॥ वनं याम्यहमप्येष यथा जीमूतवाहनः ॥ इत्यादिना व
अतोस्यात्यंतत्यागप्रधानत्वात्परमकारुणिकत्वाच्च वीतरागदृष्टांतता ॥ अन्यच्चात्रायुक्तं ॥
तथाभूतं राज्यसुखादौ निरभिलाषं नायकमुपादाय तत्र तथाभूतमलयवत्यनुरागो
पवर्णनं ॥ यच्चोक्तं ॥ सामान्यगुणयोगी द्विजादिर्धीरशांत इति तदपि परिभाषिकत्वादपा
स्तमित्यभेदकं ॥ अतो वस्तुस्थित्या बुद्धयुधिष्ठिरजीमूतवाहनादिव्यवहाराः शांततामाविर्भा
वयंति ॥ अत्रोच्यते ॥ यत्तदुक्तं सर्वोत्कर्षेण वृत्तिरौदात्यमिति ॥ न तज्जीमूतवाहनादौ परि
हीयते न ह्येकरूपैव विजिगीषुता ॥ यः केनापि शौर्यत्यागादिना अन्यानतिशेते स विजिगीषु
र्न तु यः परापकारेणार्थग्रहादिप्रवृत्तः ॥ तथात्वे च मार्गदूषकादेरपिरौदात्त्वप्रसक्तिः ॥
रामादेरपि जगत्पालनीयमिति दुष्टनिग्रहे प्रवृत्तस्य नांतरीयकत्वेन भूम्यादिलाभः ॥ ॥
जीमूतवाहनादिस्तु स्वप्राणैरपि परार्थप्रतिपादनाद्धि सर्वमप्यतिशेत इति उदात्ततमः ॥
यच्चोक्तं तिष्ठन्भातीत्यादिना विषयसुखपराङ्मुखतेति न तत्सत्यं कार्पण्यहेतुषु स्वसु
खतृष्णासु निरभिलाषा एव विजिगीषवः ॥ यदुक्तं ॥ स्वसुखनिरभिलाषः खिद्यसे लोकहे

तेः प्रतिदिनमथयातेयत्तिरेवम्विधैव ॥ अनुभवन्ति हि मूर्द्धा पादपस्तीव्रमुष्णं शमयति परितापं छायया संश्रिता
नामित्यादिनै ॥ मलयवत्यनुरागोपवर्णनं तु अशांतरसाश्रयं शांतनायकतां प्रत्युत निषेधति ॥ शांतत्वं चानहं
कृतत्वं तच्च विप्रादेरौचित्यप्राप्तमिति वस्तुस्थित्या विप्रादेः शांतता न स्वपरिभाषामात्रेण बुद्धजीमूतवाहनयो
स्तु कारुणिकत्वाविशेषेपि सकामनिष्कामकरुणत्वादिधर्मत्वाद्भेदः ॥ अतो जीमूतवाहनादेर्धीरोदात्तत्वमेव ॥
अथ धीरोद्धतः दर्प्पमात्सर्यभूयिष्ठो मायाछद्मपरायणः ॥ धीरोद्धतस्त्वहंकारी चलश्चंडो विकत्थनः ॥ दर्पः
शौर्यादिमदः ॥ मात्सर्यमसहनता ॥ मंत्रबलेनाविद्यमानवस्तुप्रकाशनं माया छद्म वंचनमात्रं ॥ चलोनच
स्थितश्चंडो रौद्रः स्वगुणशंसी विकत्थनो भवति धीरोद्धतः ॥ यथा जामदग्न्यः ॥ कैलासोद्धारसारंत्रिभुवनवि
जयेत्यादि ॥ यथा च रावणः ॥ त्रैलोक्यैश्वर्यलक्ष्मीहठहरणसहाबाहवो रावणस्या ॥ धीरललितादिशब्दाश्च
नो यथोक्तगुणसमारोपितावस्थाभिदायिनो वत्सवषभमहोसादिवत्तन्न जात्या कश्चिदवस्थितरूपो ललिता
दिरस्ति ॥ तथात्वे हि महाकविप्रबंधेषु विरुद्धानेकरूपाभिधानमसंगतमेव स्यात् ॥ जातेरनपायित्वात् ॥
यथा च भवभूतिना एकएव जामदग्न्यो ब्राह्मणातिक्रमस्यागोभवतामेवभूयते ॥ जामदग्न्यश्च वो मि
त्रमन्यथा दुर्मनायते इत्यादिना रावणं प्रति धीरोदात्तत्वेन ॥ कैलासोद्धारसारेत्यादिभिश्च रामादी
न्प्रति प्रथमं धीरोद्धतत्वेन पुनः पुण्या ब्राह्मणजातिरित्यादिभिश्च धीरशांतत्वेनोपवर्णितो न चावस्था
नराभिधानमनुचितं ॥ अंगभूतनायकानां नायकान्तरापे यामहासत्त्वादेरव्यवस्थितत्वाद्भंगिन

स्तुरामादेरकस्य बंधोपात्तात्प्रत्येकरूपत्वादारंभोपात्तवस्थानोऽन्यवस्थांतरोपादानमन्याय्यं॥ यथो
दात्ताभिमतस्य रामस्य छद्मना वालिवधात् महासत्वतयाऽऽद्यावस्थापरित्यागइति॥ वक्ष्यमा
णानां च दक्षिणाद्यवस्थानां पूर्वप्रत्यनायाहतदृत्यनायकत्वेनाविर्भावादुपात्तावस्थातोऽन्यवस्थां
तराभिधानमंगांगिनोरयुरुद्धं॥ अथ शृंगारनेत्रवस्थाः॥ स दक्षिणः शठो धृष्टः पूर्वाप्रत्यन्म
हृतः॥ नायकः प्रकरणात्पूर्वानायिकाप्रत्यन्यया नायिकयात्रपहृतचितस्यावस्थावक्ष्यमा
णभेदेन सहनुरवस्थः॥ तदेवपूर्वोक्तानां चतुर्णां प्रत्येकं चतुरवस्थत्वेन षोडशधा नायकः॥
तत्र दक्षिणोऽस्यां सहृदयः॥ योऽस्यां ज्येष्ठायां हृदयेन सह व्यवहरति स दक्षिणः॥ यथा ममै
व॥ प्रसीदंत्यालोके किमपि किमपि प्रेमगुरवा रतिक्रीडाः कोऽपि प्रतिदिनमपूर्वोऽस्य विन
यः॥ सविश्रंभः कश्चित्कथयति च किंचित्सरिजनो न चाहं प्रत्येमि प्रियसखि किमप्यस्य
विकृतिं॥ यथा च॥ उचितः प्रणयो वरं विहंतुं बहवः खंडनहेतवो हि दृष्टाः उपचारविधिर्मनस्वि
श्रीकारित्वाविशेषेपि सहृदमचेनशादादिशेषः॥ यथा॥ त्वममस्याः कांचिमणिरणितमाक
र्ण्य सहसा यदाश्लिष्यन्नेव प्रशिथिलभुजग्रंथिरभवः॥ तदेतत्क्काचक्षे घृतमधुमयत्वद्ब
हुवचोविषेणाघूर्णन्तीकिमपि न सखि मे गणयति॥ अथ धृष्टः॥ व्यक्तागो विकृतो धृष्टः॥

23

यथा॥ लाक्षालक्ष्मललाटपदमभितः केयूरमुद्रागले वक्रे कज्जलकालिमा नयनयोस्तांबूलरागोपरः॥ दृष्ट्वा
कोपविधायि मंडनमिदं प्रातश्चिरं प्रेयसो लीलातामरसोदरे मृगदृशः श्वासाः समाप्तिंगताः॥ अनुकू
लस्त्वेकनायिकः॥ अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यद्विश्रामो हृदयस्य यत्र जरसा यस्मि
न्नहार्यो रसः॥ कालेनावरणात्ययात्परिणते यत्स्नेहसारे स्थितं भद्रं तस्य सुमानुषस्य कथमप्येकं हित
त्प्राप्यते॥ किमवस्थः पुनरेषां वत्सराजादिर्नाटिकानायकः स्यात्॥ उच्यते॥ पूर्वमनुपजातनायिकां
तरानुरागोनुकूलः परतस्तु दक्षिणः॥ ननु च गूढविप्रियकारित्वादनृततरविप्रियत्वाच्छठधाष्ट्यो
अपि कस्मान्न भवतः॥ न॥ तथाविधविप्रियत्वेपि वत्सराजादेरा प्रबंधसमाप्तेर्ज्येष्ठां नायिकां प्रतिस
हृदयत्वाद्दक्षिणतैव॥ न चोभयोर्ज्येष्ठकनिष्ठयोर्नायकस्य स्नेहेन न भवितव्यमिति वाच्यमविरोधा
त्॥ महाकविप्रबंधेषु च॥ स्नाता तिष्ठति कुंतलेश्वरसुता चारोंगनौराजस्वसुः द्यूते रात्रिरियं जि
ता कमलया देवी प्रसाद्याद्य च॥ इत्यंतःपुरसुंदरीः प्रति। मया॥ विज्ञेयाय विज्ञापिते देवेनाप्रतिपत्तिमू
ढमनसा द्वित्राः॥ स्थितं नाडिकाः॥ इत्यादावपक्षपातेन सर्वासु नायिकासु प्रतिपत्त्युपनिबंधना
त्॥ तथा च भरतः॥ मधुरस्त्यागी रागं न याति मदनस्य नापि वशमेति॥ अवमानितश्च नार्या
विरज्यते स तु भवेज्ज्येष्ठः॥ इत्यत्र न रागं याति न मदनस्य वशमेतीत्यनेनऽसाधारणः

एकस्यांस्नेहोनिषिद्धोदक्षिणस्येति॥ अतोवत्सराजादेराप्रबंधसमाप्तिस्थितंतद्दाक्षिण्यमिति॥ षोडशानामपिप्रत्येकंज्येष्ठमध्याधमत्वेनअष्टाचत्वारिंशन्नायकभेदाभवंति॥ सहायानाह॥ पताकानायकस्त्वन्यःपीठमर्दोविचक्षणः॥ तस्यैवानुचरोभक्तःकिंचिदूनश्चतद्गुणैः॥ प्रागुक्तप्रासंगिकेतिवृत्तविशेषः॥ पताकानायकः॥ पीठमर्द्दप्रधानेतिवृत्तनायक[illegible]सहायः॥ यथामालतीमाधवेमकरंदः॥ रामायणेसुग्रीवः॥ सहायांतरमाह॥ एकविद्योविटश्चान्योहास्यकृच्चविदूषकः॥ गीतावि दि५ द्यानांनायकोपयोगिनीनांएकस्याविद्यायावेदिताविटः॥ हास्यकारीचविदूषकः॥ एतस्यचविकृताकारवेषादित्वंहास्यकारित्वेनैवलक्ष्यते॥ यथाशेखरकोनागानंदेविटःविदूषकःप्रसिद्धः॥ अथप्रतिपक्षनायकः॥ लुब्धोधीरोद्धतस्तब्धःपापकृद्व्यसनीरिपुः॥ तस्यनायकस्येत्थंभूतःप्रतिनायकोभवति॥ यथारामयुधिष्ठिरयोरावणदुर्योधनौ॥ अथसात्विकानायकगुणाः॥ शोभाविलासोमाधुर्यंगाम्भीर्यंस्थैर्यंतेजसी॥ ललितौदार्यमित्यष्टौसत्वजाःपौरुषागुणाः॥ तत्र॥ नीचेघृणाधिकेस्पर्द्धाशोभायांशौर्यदक्षते॥ नीचेघृणायथा॥ उत्तालताडकोत्पातदर्शनेप्यप्रकंपितः॥ नियुक्तस्तत्प्रमाथायस्त्रैणेनविचिकित्सति॥ गुणाधिकेस्पर्द्धायथा॥ एतांपश्यपुरस्तटीमिहकिलक्रीडाकिरातोहरःकोदंडेनकिरीटिनासरभसंचूडांतरेताडितः॥ इत्याकर्ण्यकथाद्भुतंहिमनिधावद्रौसुभद्रा

पतेर्मदमदमकारि येन निजयोर्द्दोर्द्दण्डयोर्मण्डनं ॥ शौर्यच्छोभा यथा ममैच ॥ अन्त्रैः स्वैरपि संयताग्रचरणो मूर्छाविरामक्षणे स्वाधीनव्रणितांगशस्त्रसचिवो रोमोद्गमं वर्म्मयन् ॥ मग्नानुद्वलयन्निजान्परभटानाधर्षयन्निष्ठुरं धन्यो धाम जयश्रियः पृथुरणस्तंभे पताकायते ॥ दक्षच्छोभा यथा ॥ स्फूर्ज्जद्वज्रसहस्रनिर्मितमिव प्रादुर्भवत्यग्रतो रामस्य त्रिपुरांतकृद्दिविषदां तेजोभिरिद्धं धनुः ॥ सुण्डारः कलभेन यद्वदचले वत्सेन दोर्दण्डकस्तस्मिन्नाहित एव गर्ज्जितगुणं कृष्टं च भग्नं च तत् ॥ अथ विलासः ॥ गतिः सधैर्या दृष्टिश्च विलासे सस्मितं वचः ॥ यथा ॥ दृष्टिस्तृणीकृतजगत्त्रयसत्वसारा धीरोद्धता नमयतीव गतिर्धरित्रीं ॥ कौमारकेऽपि गिरिवद्गुरुतां दधानो वीरो रसः किमयमेत्युत दर्प एव ॥ अथ माधुर्यं ॥ अलक्ष्यो विकारो माधुर्यं संक्षोभे सुमहत्यपि ॥ महत्यपि विकारहेतौ मधुरो विकारो माधुर्यं ॥ यथा ॥ कपोले जानक्याः करिकलभदंतद्युतिमुषि स्मरस्मेरगंडोड्डुमरपुलकं वक्त्रकमलं ॥ मुहुः पस्यन्नस्रुण्वन्नजनिचरसेनाकलकलं जयजूटग्रंथिं द्रढयति रघूणां परिवढः ॥ अथ गौ गांभीर्यं ॥ गांभीर्यं यत्प्रभावेन विकारो नोपलक्ष्यते ॥ मृदुर्विकारोपलंभात् विकारानुपलब्धिरन्येति माधुर्यादन्यद्गांभीर्यं ॥ यथा ॥ आहूतस्याभिषेकाय विसृष्टस्य वनाय च ॥ न मया लक्षितस्तस्य स्वल्पोप्याकारविभ्रमः ॥ अथ

च

स्थैर्यं॥ व्यवसायावचलनं स्थैर्यं विघ्नाकुलादपि॥ यथा॥ प्रायश्चित्तं रिष्यामि पूज्यानां वो व्यतिक्रमात्॥ नत्वेतत् दूषयिष्यौष्या
मिशास्त्रग्रहमहाव्रतं॥ अथ तेजः॥ अधिक्षेपाद्यसहनं तेजः प्राणात्ययेष्वपि॥ यथा॥ ब्रूत नूतनकूष्मांडफला
नां के भवंत्यमी॥ अंगुलीदर्शनादेयेन जीवंति मनस्विनः॥ अथ ललितं॥ शृंगाराकारचेष्टात्वं सहजं ल
लितं मृदु॥ स्वाभाविकः शृंगाराकारो मृदुः तथाविधा शृंगारचेष्टा च ललितं यथा ममैव॥ लावण्यमन्मथ
विलासविजृंभितेन स्वाभाविकेन सुकुमारमनोहरेण॥ किंवा ममैव सखि योपि ममोपदेष्टा तस्यैव किंन
विषमं विदधीत तापं॥ अथौदार्यं॥ प्रियोक्त्याजीविताद्दानमौदार्यं सदुपग्रहः॥ प्रियवचनेन सहजीविता
है दानमौदार्यं सदुपग्रहश्च॥ यथा॥ शिरामुखैः स्यंदत एव रक्तमद्यापि देहे मम मांसमस्ति॥ तृप्तिं न
पश्यामि तवैव तावत् किंभक्षणात्त्वं विरतो गरुत्मन्॥ सदुपग्रहो यथा॥ एते वयममी दाराः कन्येयं
कुलजीवितं॥ ब्रूत येनात्र वः कार्यमनास्था बाह्यवस्तुषु॥ १५॥ अथ नायिकाः॥ स्वान्या साधार
णस्त्रीति तद्गुणा नायिका त्रिधा॥ तद्गुणेति यथोक्तसंभाविनायकसामान्यगुणयोगिनी नायके
ति॥ स्वस्त्री परस्त्री साधारणस्त्रीत्यनेन विभागेन त्रिधा॥ तत्र स्वीयाया विभागगर्भं सामान्य
लक्षणमाह॥ मुग्धा मध्या प्रगल्भेति स्वापि शीलार्जवादियुक्॥ पतिव्रता॥ अकुटिला॥ लज्जा
वती॥ पुरुषोपचारनैपुणा स्वीया नायिका॥ तत्र शीलवती यथा॥ कुलवालिआए पेखह जो

बुणला लावह्मवि भ्रमविलासा॥ पवसंतिव्वपवसिएएंनिव्वपिएघरंएंति॥ आर्ज्जवाद्दियोगिनीयथा॥ ह
सिअयचिआरमुद्धंपमिभ्रंविरहिअविलाससछायं॥ कणिअंसा हावसरलंधणधरेकलत्ताणं॥ ल
ज्जावतीयथा॥ लज्जापज्जंतपसाहणाइं परतत्तिणिप्पिपासाइं॥ अविणहुम्मेधाइं घणधरे कुले
ताइं॥ साचैवंविधास्वीया॥ मुग्धामध्याप्रगल्भेतिभेदात्त्रिधा॥ तत्र॥ मुग्धानववयःकामारतौवामामृदुः
रुक्रुधि॥ प्रथमावतीर्णतारुण्यमन्मथारमणेवामशीलामुखोपायप्रसादाभिमुखीग्धानायिका॥
त्रैतेवयोमुग्धायथा॥ विस्तारीस्तनभारएषगमितोनस्वोचितामुन्नतीं रेखोद्भासिकृतंवलित्रय

KKSU LIBRARY
RAMTEK
441 106
M.1433
Dist. Nagpur

```
[OrderDescription]
,CREATED=19.10.20 16:48
,TRANSFERRED=2020/10/19 at 16:52:48
,PAGES=28
,TYPE=STD
,NAME=S0004194
,Book Name=M-1443-NALODEV
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
```

```
FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,
```